सप्तमः पाठः

प्रहेलिकाः

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः।

गुणस्यूतिः समृद्धोऽपि परपादेन गच्छति ।। 1 ।।

शोभितोऽस्मि शिखण्डेन दीर्घैः पक्षैरलङ्कृतः।

राष्ट्रियो विहगश्चास्मि, नृत्यं पश्यन्ति मे जनाः।। 2 ।।

पठितो नास्म्यहं किञ्चित् तथापि साक्षरोऽस्म्यहम्।

पादैर्विनैव गच्छामि कथयामि विना मुखम् ।। 3 ।।

क्वचित् प्रस्तरतुल्योऽस्मि क्वचिच्च तरलं पुनः।

क्वचिद्वायुसमं सूक्ष्मं, मां पश्यन्ति सदा जनाः ।। 4 ।।

रेफादौ मकारोऽन्ते वाल्मीकिः यस्य गायकः।

सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रियः ।। 5 ।।

अभ्यासः

1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

दन्तैर्हीनः पक्षैरलङ्कृतः क्वचिद्वायुसमम्

साक्षरोऽस्म्यहम् पादैर्विनैव प्रस्तरतुल्योऽस्मि

शब्दार्थः

दन्तैः हीनः = दाँतो से रहित (बिना दाँत के)। **शिलाभक्षी** = पत्थर खाने वाला। **निर्जीवः** = बेजान। **गुणस्यूतिः** = सूत (रस्सी) से सिला। **समृद्धोऽपि** = धनवान होने पर भी। **परपादेन** = दूसरे के पैर से। **शिखण्डेन** = पंख (मयूर पिच्छ) से। **विहगश्चास्मि** = (विहगः+च+अस्मि) और पक्षी हूँ। **पादैर्विनैव** = (पादैः+विना+एव) पैरों के बिना ही। **साक्षरोऽस्म्यहम्** = (साक्षरः+अस्मि+अहम्) मैं साक्षर हूँ, अक्षर सहित। **प्रस्तर-तुल्यम्** = पत्थर की तरह (कठोर)। **रेफादौ** = प्रारम्भ में रेफ (र)।**उपानह्** = जूता (इसका रूप 'उपानत्-उपानहौ-उपानहः' -जैसा चलता है।)

2. एकपदेन उत्तरत -

(क) दन्तैः हीनः शिलाभक्षी कः अस्ति ?

(ख) पादैः विना कः गच्छति ?

(ग) राष्ट्रियः विहगः कः अस्ति ?

(घ) कस्य राज्यं सर्वश्रेष्ठम् ?

(ङ) पाठे जलस्य कति रूपाणि वर्णितानि ?

3. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-

न विना सदा पुनः च

यथा- छात्राः ..सदा.....शिक्षकं नमन्ति।

(क) असत्यवचनं ....कथनीयम्।

(ख) प्रतिदिनं दन्तधावनं स्नानं.................. कुर्यात्।

(ग) जलं .... जीवनं न सम्भवति।

(घ) स्वपाठं .... पठ।

4. पाठे प्रयुक्तानि लट्लकारस्य क्रियापदानि लिखत-

यथा- गच्छति, अस्मि ....

5. सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

समृद्धोऽपि ....

शोभितोऽस्मि ....

मकारोऽन्ते ....

क्वचिच्च ....

6. उपयुक्तशब्देन वाक्यं पूरयत-

(क) मयूराः ....। (नृत्यति, नृत्यन्ति।)

(ख) जनाः .... पिबन्ति। (जलम्, जलेन।)

(ग) जनाः चित्राणि .... । (पश्यन्ति, पश्यति।)

7. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -

यथा- मयूरस्य नृत्यं जनाः पश्यन्ति। मयूरस्य नृत्यं के पश्यन्ति ?

(क) उपानत् परपादेन गच्छति।

(ख) पत्रं पादेन विना गच्छति।

(ग) हिमः जलस्य एव रूपम् अस्ति।

8.चित्रं दृष्ट्वा मञ्जूषातः पदानि च चित्वा वाक्यानि रचयत -

पश्यन्ति, जनाः, बालकाः, देविका, केशवः, खेलन्ति, खगाः, पश्यति

पुष्पाणि, चित्रपतङ्गाः, सूर्यः, उड्यन्ते, कूजन्ति, उदयति, सन्ति।

.शिक्षण-सङ्केतः

क) बालकाः परस्परं प्रहेलिकाः पृच्छन्तु, इत्थं कथयत।

(ख) बालकैः अन्यप्रहेलिकानां सङ्ग्रहं कारयत।

प्रहेलिकायाः उत्तराणि-ख्जलम्, पत्रम्, रामः, उपानत्(ह्), मयूरः,

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।